DPN 6897

दशकर्म पद्धति DAŚAKARMA PADDHATI

Title :

Run. No. 7622 Cat. No. Micro. No.

Subject ~~H~~indu Ritual Religion : Hindu / Bauddha

Language : Skt. / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 8·0×24 Folios 100+16+7+119+3 245 Lines (in a page) 5

Compl. / Incompl. Chapt. / act /

Author / translator ⇒ गोविन्दलाल शर्मा Govinda Lall Sharma.

Date: NS / SS / VS / KS Scribe / donor सुगतदास तुलाधर

Script : New. / Dev. / Bhuj. / Ran. / Ruler / place Sugata Dasa Tuladhar.

Material : palmleaf / paper / thyasaphu / Illus. : Colour paings of Ganesha, Bhairava, Mahalaxmi and Mahakala. (1) Ganesha, Mahadeva, Parbati and Kumara (2)

Condition : fine / damaged by worms, rats, water /

Beginning, colophon, post-colophon :

P.T.O.

9· चूडाकरण (1-22)
श्री गणेशाय नमः ॥

2. उपनयन (23 - 49)
3. वेदारम्भ (50 - 68)
4. समावर्तन (69 - 99)

पुस्तकस्थ नेपाली सम्वत् ९११ श्रीसम्वत् १९८४ साके संवत् १८२९ फाल्गुण मासे शुक्लपक्षे अष्टमी सौमवासरे लिखितमिदं गोविन्दलाल शर्मणेन ॥

5. आचार्यवरण (1-1)
6. मातृकापूजा (2-8)
7. आभ्युदयिक श्राद्ध (7-16)
8. यज्ञोपवीत दान (1-10)
9. अष्टमंगल (2-7)
10. विवाह कर्म (1-39)
11. उत्तरविवाह (40-56)
12. विवाह कर्म (57-77)
13. निष्क्रमण (78-79)
14. नामकरण (79-97 ; 98)
15. अन्नप्राशन (99-113)
16. चूडाकरणम् (114-119)

25
20
15
10
5
0 centimeters 5 10 15 20 25 30 35

0 centimeters 5 10 15 20 25 30 35

श्रीगणेशाय नमः ॥ अथ चूडाकरणं ॥ ॥ तत्र तृतीयाब्दे पुण्यदिनेपितावद्वि
ज्ञानायोपाध्यायः उपविष्टः मातृकापूजाभ्युदयिके कृत्वा कुशाग्रैः
कोकुर्य्यात् ततः कर्मः ॥ अभ्यक्षनादि कर्म्म कर्मं कुशप्रच्छादितमुदक
मानेतव्यं ततो नरपुरोदेशः समोवा परिशोधयः ॥ कुशैर्हलमात्रं परि
समुह्य गोमयोदकेनोपलिप्य अग्निस्थापनपर्य्यंतं नामहलेभूमा

चूडा·
1

वारोप्य·दक्षिणजानुं भूमावेव पातयित्वा· फलपुष्पकुशानामंस
तमंगृहीत्वा·रेषापश्चकंकुर्यात्॥ ततः प्रथमं पूर्वाया· द्वादशाङ्गुल
प्रमाणं·पृथिवीदेवताकाध्येय·पीतवर्णालेखालिखितव्या॥ त
ल्लेखापश्चिमभागसंलग्ना·उभरायां·एकविंशत्यङ्गुलप्रमाणंअ
ग्निदेवताकाध्येय·लोहितवर्णलेखालिखितव्या॥ तल्लेखासंलग्ना राम·

पूर्वायलेखातः षडङ्गुलान्तराला पूर्वगामिनी प्रादेशप्रमाणं·प्रजापति
देवताकाध्येय·कृष्णवर्णालेखालिखितव्या॥ तस्यापिषडङ्गुलान्त
राला·पूर्वगामिनीप्रादेशप्रमाणं·ईंद्रदेवताकाध्येय·नीलवर्ण
लेखालिखितव्या॥ तस्यापिषडङ्गुलान्तराला पूर्वगामिनी द्वादश
ङ्गुलप्रमाणं·सोमदेवताकाध्येय·शुक्लवर्णलेखालिखितव्या॥ ए

वंलेखाप च्चकं कृत्वा॥ ॥ग्रनामिकाङ्गु ष्ठाभ्यां ताभ्य एवमङ्गु ष्ठ
मित्वा ऐशान्यां क्षिपेत्॥ ततोनलेनलेखाभ्युक्षणं कृत्वा समिधा
पितकोस्पभाजनस्थेग्नौज्वलनृणेनिरस्मन्त्यनेन॥ प्रजापतिरृषि
स्त्रिष्टुप्छन्दोऽग्निर्देवताग्न्याधेयविनियोगः॥ ॐ कव्यादमग्निं
प्रहिनोमिदूरं यमराज्यं गच्छतु रिप्रवाहः॥ ततोग्निंप्रणयेदनेन॥ ग्राम·

प्रजापतिरृषिर्बृहतीछन्दो बृहस्पतिर्देवताग्न्याधाने विनियोगः
॥ॐ भूर्भुवः स्वः ईत्यग्निमुखमग्निं प्रणयेत्॥ ततोवामहस्तंजानुचोत्था
प्य॥ ग्रञ्जलिंबध्वा॥ ॐ ईडेवाग्नमिनरोजातवेदादेवेभ्योहव्यंवहन
प्रजा ईत्यग्नेरुपस्थानं॥ ततःपाणितदक्षिणजानुः॥ प्रादेशमि
तंसमिधंग्रनाक्लोनूखलीमग्नौक्षिपेत्॥ ततोब्रह्मवरणं॥ ततोग्नेरा

स्रिंपरिक्रम्याग्नेईक्षिणतऊर्ध्वजानुःप्रत्यङ्मुखोवस्थिस्वन-ब्रह्मासने
पाङ्मुखोम्बारिधारादत्वा-तस्याउपरिप्रागग्रान्कुशान्नास्रीर्य्यः
प्रत्यङ्मुखोवस्थिस्वन-वामहस्तानाभिकाङ्गुष्ठाभ्यां-ब्रह्मासनादर्भमेकं
गृहीत्वा-नेत्रेत्यांक्षिपेदनेन॥प्रजापतेऋषिर्गायत्रीछन्दोग्निर्दे
वता-ब्रह्मासनानयनेविनियोगः॥ॐनिरस्तःपरावसुःइति रम्-

त्रिरम्भस्त्रिरस्म॥ततःउदकमुपस्पृश्य॥ब्रह्माणमुपवेशयेदनेन॥
प्रजापतेऋषिस्त्रिष्टुप्छन्दोग्निर्देवताब्रह्मोपवेशनेविनियोगः
॥ॐश्रावसोःसदनेसोदःइतिपूर्वोक्तान्पतमंब्रह्माणमुपवेशयेत्॥
ब्राह्मणम्प्रक्षेवरणप्रतिवचनादिकंसूक्ष्मं॥ततोब्रह्मोपरिप्रागग्रान्
कुशान्नास्रीर्य्य॥जलेनाभ्युक्ष्यब्रह्मानंस्पृष्वाजपेत्॥प्रजापतेऋ

षिर्गायत्रीछन्दोविल्वईवताजपेविनियोगः॥ॐईदंविल्वर्विचक्र
मेत्रेधानिदधेपदं॥समूढमस्यपांसुले॥ईतिजप्त्वानेनैवयथा
परावृत्यपत्नीस्थानंगछेत्॥ततःउपविश्य॥ततोदक्षिणाजानुपातई
त्वाउपरिकृतदक्षिणहस्तःकरद्वयमधोमुखंभूमावारोप्यभू
मिजपंकुर्य्यात्॥परमेष्ठीक्रषिरनुष्टुप्छन्दोरुद्रोदेईवताभूमिज

रात्र.

चविनियोगः॥ॐईदंभूमेर्भजामहईदंभद्रंसुमङ्गलं॥परासपत्ना
बाधत्वास्यांविन्दतेधनं॥रात्रौवसुशब्दमुच्चारयेत्॥ततोजानू
त्थाप्यदक्षिणहस्तेनकुशत्रयंगृहीत्वाअग्नेरुत्तरादितःप्रदक्षिण
क्रमेणप्रतिसरंपरिसमूहेत्॥कौत्सऋषिर्जगतीछन्दोग्निईव
तापृथ्वस्यवडहस्यबध्नेग्रहंन्यग्निमारुतेशलेपरिसमूहनेविनियो

गः॥ ॐ ईमे सोमम्मदे ते जातवेदसेरथमिवसम्महेमनीषया॥ भद्रा
हिनः प्रमतिरस्यसंसद्यग्नेसख्येमारिषामावयत्तवेईत्यग्नेऽभरन्तः॥ ॐ
भरामेध्मंकृणवामाहवींषितेचितयन्तःपर्वणापर्वणावयं॥ जीवातं
वेपतरोसाधयाधियोग्नेसख्येमारिषामावयत्तवेईतिपूर्वेनः॥ ॐ इ
केमत्वास्मिन्संसाधयाधियोयेत्वेदेवाहविरदन्त्याहुतं॥ त्वमादित्यांम्रा

राम-

वहतोह्युशत्स्यग्नेसख्येमारिषामावयत्तवेईतिदक्षिणतः॥ परिसमु ह्य
वर्हिरिरयेमृतान्याछादयन्नुशिग्वृत्तंपश्चात्तंवापुरस्ताद्दक्षिण
तः॥ उत्तरतःपश्चात्तत्तरणंकुर्यात्॥ ततःपूर्वोक्तान्खादिरादीन्वि
ज्ञातान्धान्मूलमध्यायक्रमेणघृतान्क्रोडप्रादेशान्समपरिमितान्प्रजा
पतिंमनसाध्यात्वातूष्णीमग्नौजुहूयात्॥ ततस्तंतंदेवतंहविर्वःसाग्रकु

शपत्रद्वयं गृहीत्वाग्नेदक्षमात्रं कृत्वा कुशमन्त्रीयद्भिर्घृतदर्वेण॥प्रजा
पतिऋषिःपवित्रंदेवतेपवित्रद्वंदेविनियोगः॥ॐपवित्रेस्थोवैष्णव्यौ·
सवितुर्वःप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिःतस्यतेपवित्रपते
यत्कामःपुनेतंतच्छकेयम्॥प्रजापतिऋषिःपवित्रंदेवतेपवित्रंसम्मार्ज
नेविनियोगः॥ॐविष्णोर्मनसापूतेस्थः॥इतिसंमृज्याज्यस्थाल्यामुद
गग्रेपवित्रेनिधायाज्यमावेक्षेत॥ततोव्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां राम-

गृहीतपवित्राभ्यामाज्यमूर्ध्वीकृत्यसकृत्क्षिपेदनेन॥प्रजापतिऋषि·
राज्यंदेवताआज्योत्पवनेविनियोगः॥ॐदेवस्त्वासवितोत्पुनात्वच्छि
द्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिःत्वाहनतोद्विरुल्लीं नतःप
वित्रजलेनाभ्युक्ष्यतूष्णीमग्नौक्षिपेत्॥ततःआज्यपात्रमुदकेनाभ्यु
क्ष्याग्नेरुत्तरतोवास्त्रयमवतारयेत्॥इत्याज्यसंस्कारः॥

चूडा-
कर्म

एवंकृवसंस्कारोपि॥ ॥ततःसच्यनाभ्यिग्र्यौतिलतण्डुलमुङ्
गाधिनंस्थालीपाकंपचेत्तस्तेचरोतमवतार्य्य॰एकविंशतिदर्भपि
जलिःसप्त॰सप्तत्रिधावद्धाःइध्मोदकपूर्णकांस्यपात्रंताम्रक्षुरं॰श्राद
र्ईम्बाक्षुरहस्तंनापितञ्चाग्नेईक्षिणतःस्थापयेत्॰श्रौंदुंबरोम न
यं॰स्थालीपाकंचोत्तरतोग्नेस्थापयेत्॥ततोव्रीहियवतिलमाषैःप्रत्ये राम॰

त्या

कंपात्राणिपूरयित्वाव्रीहियवाभ्यांतिलमाषाभ्यांमिलिताभ्यांच
पात्रद्वयंपूरयित्वाउत्तरतश्चाग्नेःपुरतःस्थापयेत्॥ ॥अथकर्ण
वेधः॥नवम्यांतीयपर्वचैपंचमेवापुष्यहस्तविशाखाचित्राहरिरेवत्यंत्रतम
नक्षत्रेशुभतिथौपूर्वाह्णेपित्र्योवापूर्वाभिमुखोपविश्यकुमारस्य
दक्षिणकर्णेभिःश्रुतिभिरनुमंत्रयेन्माक्षभिर्यजमानः॥विरो
चमानमग्निमंत्रयामितन्नमंत्रः॥ॐभद्रंक१

0 centimeters 5 10 15 20 25 30 35

रज्जै सुषुवांसमृत्विर्ग्भ्यो महिदेवहिनं मदाय॥ईतिननोवामक
र्णमसि मंत्रयतिॐवक्षंनिवेदागनीगन्धिकर्णाय्यंसखायंपरिष
स्वजाना॥योषेवशिंकेवितनाधिधन्वंज्याइयंसमनेपारयंती॥ई
तिमंत्रेण॥ननोमध्यंनिरीक्ष्यनाभितद्वारावेधयेत्॥नाभ्यंत्रेवाव
तरेमधुरादिहानमाचारात्॥ननोब्राह्मणभोजनं॥ईतिकर्णवेधः समः

ननोभ्रूगतदक्षिणजानुःउदकंत्वातोमयेकृत्यःअग्निःपर्युक्षणं
कुर्य्यात्॥प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचनेविनि
योगः॥ॐअनुदितेअनुमन्यस्वइत्यग्नेर्दक्षिणतःपूर्वायामञ्जलि
धारादद्यात्॥प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने
विनियोगः॥ॐअनुमतेअनुमन्यस्वइत्यग्नेःपश्चादुत्तरार्द्धे॥प्रजाप

चूडा-
९

निऋरधिः सरस्वतीदेवतोदकाञ्जलिप्रतेचने विनियोगः॥ ॐ सरस्व
त्यनुमन्यस्वेत्यग्नेस्तनूरसीत्यस्य पूर्वार्धस्यामञ्जलिधारादधात्॥ प्रजापते
ऋषिस्त्रिष्टुप्छन्दः सवितादेवताग्निपर्युक्षणे विनियोगः॥ ॐदेव
सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो गन्धर्वः केतपूः केतं नः पुनातु
वाचस्पतिर्वाजं नः स्वदतु॥ इतिहोमीयइध्मसहितस्याग्नेर्द्विपरीतवा एम-

प्रसुवाप्रदक्षि२

रिधारयानेदनंकुर्यात्॥ ततोगाढुत्थाप्यसमिधमेकांकुशपुष्प-
फलसहितांगृहीत्वा-उपरिकृतदक्षिणहस्तोविरूपाक्षंजपेत्॥ प
रमेष्ठीऋषिर्निगद्छन्दःकालाग्निरुद्ररूपोग्निर्देवताविरूपाक्ष
जपेविनियोगः॥ ॐतपश्चतेजश्चश्रद्धाचहीश्चसत्यंचाक्रोधश्च
त्यागश्चधृतिश्चधर्म्मश्चसत्यंश्चवाङ्मनश्चात्माचब्रह्मचं-ता

चूडा-
१०

निप्रपद्ये नानिमामवतु ॐ भूर्भुवःस्वरोँमहान्तमात्मानंप्रपद्ये विहृ
पाक्षोसदनंजिह्मस्यनेशय्यापरोगृहान्नरिक्षेविमितंहिरण्मयं
तेदेवानोहृदयान्यप्रत्मये कुक्षेश्चनःसन्निहितानि नाभिवल्भ
वलमाचरक्षतोप्रमनोश्रनिमिषतूतत्तंयनेदादशपुत्रान्तं त्वा
सम्वत्सरेक्रमपेणयज्ञोनयाजयिन्नापुनर्ब्रह्मचर्य्यमु

राम-

पयन्तित्वंदेवेषुब्राह्मणंसहमनुष्येषुब्राह्मणंवैब्राह्मणमुष
धावत्सुपत्नाधावामिजपन्नंमामाप्रतिजापिर्जुहूनंमामाप्रतिहो
सिःकुर्वन्तंमामाप्रतिकाशीस्त्वाप्रपद्ये त्वयाप्रसूतईदंकर्म्मकरि
ष्यामि तन्मेराध्यतांतन्मेसमृध्यतांतन्मेउपपद्यतांसमुद्रोमावि
श्वव्यचावब्रह्मानुजानातुनुचोमाविश्वेदाब्रह्मणःपुत्रोनुजानातुश्चा

नो मापेचेता मेचावतरणं नुजानातु तस्मेविहुषायदन्नमश्नीयस
मुदायविश्वमयमेमुखायविश्ववेदसेनायप्रवेतसेतहत्याक्षाय
ब्रह्मणःपुत्रायनमः॥इतिमंत्रेणकुशमेक्षान्योत्पन्नकाफलपुष्पं
ब्रह्मणोनिवेद्यपातितदक्षिणाजानुः॥घृताक्तौतावेधंतूनीमग्नौ
क्षिपत्॥ततस्तत्संस्कृतस्यनाम्नोग्नेःपश्चादधत्वाद्यन्माहुति राम-

होमंकुर्य्यात्॥ ॥प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवताव्याहृतिहो
मेविनियोगः॥ॐभूःस्वाहा॥प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देवता
व्याहृतिहोमेविनियोगः॥ॐभुवःस्वाहा॥प्रजापतेऋषिरनुष्टुप्छन्दः सू
र्य्योदेवताव्याहृतिहोमेविनियोगः॥ॐस्वःस्वाहा॥प्रजापतेऋषिर्बृ
हतीछन्दोबृहस्पतिर्देवता महाव्याहृतिहोमेविनियोगः॥ॐभूर्भुवः

चूडा-
१२

स्वः स्वाहा॥ ततो माताश्चुचिनावत्तेरण कुमारमाद्यग्नेः पश्चादुभरा
ग्नेषु कुशेषु प्राङ्मुखोऽपविशेत्॥ चूडाकरणकर्तात्मनः पश्चादू
र्ध्वस्थितः प्राङ्मुखः सन् सवितारं मनसाध्यायन् क्षुरहस्तं नापितं प्रे
क्षमाणोजपेत्॥ प्रजापतिऋषिः सवितादेवता चूडाकरणे क्षुरहस्त
नापितप्रेक्षणेविनियोगः॥ ॐ स्योनापृथिवि भवानृक्षरा निवेशनी यच्छा
नः शर्म सप्रथाः अप नः शोशुचदघं॥ ततो वापं राम-

ध्यायन् उल्लोदकपूर्णकांस्यपात्रंप्रेक्षमाणोजपेत्॥ प्रजापतिऋ
षिर्वापुर्देवता चूडाकरणे उल्लोदककांस्यप्रेक्षणेविनियोगः॥ ॐ
उल्लेनवापउदकेनैधि शंतनः उल्लोदककांस्यादक्षिणेनपाणिना
उल्लोदकमादाय दक्षिणंजानुकांसिचेदनेन॥ प्रजापतिऋषि
रापोदेवता चूडाकर्म्मणिजानुकांसेकदनेविनियोगः॥ ॐ आपउं

चूडा- दनुजीवसे॥ ननन्नाम्नक्षुरंप्रेक्षमाणोजपति॥प्रजापतिऋषिः क्षु
१३ रोदेवता-चूडाकर्म्मणिनाम्नक्षुरप्रेक्षणेविनियोगः॥ॐवेल्लोई
क्षोसि-ननः पूर्ब्बोपकल्पिनाःसप्तदर्भपिञ्जलिंगृहीत्वा-उर्द्ध मू
लाःदक्षिणजुटिकायांनिदधाति॥प्रजापतिऋषिरोषड्ढोदेवता
चूडाकर्म्मणिस्वमिशिरोग्रदर्भपिञ्जलीनिधानेविनियोगः॥ॐ राम-

या

ओषधेत्रायस्वैनं-ननोदर्भपिञ्जलीभिःसहितांजुटिकां-वामहस्तेनगृ
हीत्वा-उर्द्ध मूलांजुटिकांनिदधाति॥प्रजापतिऋषिःस्वधितिर्देवता चू
डाकर्म्मणिजुटिकायांक्षुरनिधानेविनियोगः॥ॐस्वधितेमैनंहिंसीः
ततःक्षुरंकेशछेदमकुर्वन्-सकृत्प्राङ्मुखंप्रेरयेदनेन॥प्रजापति-ऋ
षिःपूषादेवता-चूडाकर्म्मणिकपुञ्जिकायांक्षुरप्रेरणेविनियोगः॥ॐ

चूडा-
१४

येनपूषाबृहस्पतेर्वीर्येरिन्द्रस्यवापयत्॥तेननेवापामिवब्रह्मणाजी
वातवेजीवनायदीर्घायुत्वायवर्चसेइतिसकृत्॥ततोदक्षि
णेकर्णेपेरेयत्॥ततोलौहक्षुरेणजुष्टिंकल्पित्वासहदर्भपिंजलीभिःस
हितोत्तस्मिन्नेवपूर्वस्थापितेआनडुहोमयेस्थोपयेत्॥ ॥
एतदनन्तरंकूकाटिकोपरिबद्धजुष्टिंकोयंकपुच्छलाभिधानापो- ग्रम-

सिंचनादिपूर्ववत्कुर्यात्॥प्रजापतिऋषिरापोदेवता-चूडाकर्मणि
कपुच्छलक्केदनेविनियोगः॥ॐस्योषुंदनुजीवसे॥ततस्तामक्षुरंपे
क्षमाणोजपति॥प्रजापतिऋषिःक्षुरोदेवता-चूडाकर्मणितामक्षुर
प्रेक्षणेविनियोगः॥ॐविष्णोर्ईष्ट्रोसि-ततःसप्तदर्भपिंजलीगृही
त्वा-ऊर्ध्वमूनाःकपुच्छलेनिदधाति॥प्रजापतिऋषिरोषधयोदेव

चूडा-
१५

ना चूडाकर्म्मणि अग्निशिरो यदर्भपिञ्जलिनिधानेविनियोगः॥ॐ
ओषधेत्रायस्वैनं नतोदर्भपिञ्जलीभिः सहितांजुहिकां वामहस्तेन गृही
त्वा दक्षिणहस्तेन ताम्रक्षुरं कपुच्छलेनिदधाति॥प्रजापतेऋषिः त्र
ध्यतिर्देवता चूडाकर्म्मणि कपुच्छलेक्षुरनिधानेविनियोगः॥ॐ त्र्यंबके
नैमेनंहिंसीः नतस्ताम्रक्षुरं केशछेदमकुर्वन् सकृन्नापसव्यंप्रेरयेद् राम-

नेन॥प्रजापतेऋषेः पूषादेवता चूडाकर्म्मणि कपुच्छलेक्षुरप्रेरणे।
विनियोगः॥ॐयेन पूषावहत्यतेर्वायोरिडस्पदावपत्॥तेननेवया
मिब्रह्मणाजीवानवेजीवनायदीर्घायुत्वायवलायवर्च्चसे॥ततोदि
नूक्षींप्रेरयेत्॥ततोनोहक्षुरेणकपुच्छलंछित्वा सहदर्भपिञ्जलीभिः
सहितांतस्मिन्नेवान दुहगोमयेस्थापयेत्॥ततउत्तरजुहिकांवा कपुच्छि

चूडा-
१६

कार्योग्निधानांतं पुनःसिंचनादि पूर्ववत् कुर्यात्॥ प्रजापतिऋषिरा
पोदेवता-चूडाकर्म्मणिक्षुरक्रियाकाले विनियोगः॥ ॐ शापऽउदभु
जीवसे॥ ननस्तोक्मायक्षुरंप्रेक्षमाणोजपति॥ प्रजापतिऋषिःक्षुरोदेवता-चू
डाकर्म्मणिनाम्नक्षुरप्रेक्षणेविनियोगः॥ ॐ विल्वो ईंद्रोसितनःसप्त
दर्भपिञ्जलीगृहीत्वा-ऊर्द्ध्वमूलाग्रत्रयंकार्योनिदधाति॥ प्रजापति

राम-

ऋषिरोषऽओषदेवता चूडाकर्म्मणि अग्निशिरोग्रदर्भपिञ्जलीनिधानेवि
नियोगः॥ ॐ ओषधेत्रायस्वैनंस्वधेत्वैनंतोदर्भपिञ्जलीभिःसहितांजुहिकांवाम
हस्तेनगृहीत्वा-दक्षिणहस्तेननाम्नक्षुरंकपुञ्जिकायांनिदधाति॥ प्रजा
पतिऋषिःस्वधितिर्देवताचूडाकर्म्मणिकपुञ्जिकायांक्षुरनिधानेविनियोगः॥ ॐ
स्वधितेमैनंहिंसीःतत्लाग्रक्षुरंकेशछेदनकुर्वन्नसकृत्तप्रायुषंवेरयेदनेनः

चूडा

चूडा-
उ

॥प्रजापतिर्ऋषिः पूषोदेवता चूडाकर्म्मणि कपुल्लिकायां क्षुरप्रेरणे विनियोगः
॥ॐ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्॥ तेनते वपामि ब्रह्मणा जीवान
वे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे॥ ततो द्वितूष्णीं क्षुरप्रेरयेत्॥ ततोलौ
हक्षुरप्रं कपुल्लिकां छित्वा सहदर्भविञ्जलीभिः सहितां तस्मिन्नेवानड एम-
हो मये स्थापयेत्॥ ॥ततः पाणिभ्यां कुमारस्य मूर्द्धानं परिगृह्य जपेत्॥

प्रजापतिर्ऋषिर्हृल्लिकाद्रोजामदग्न्यादयोदेवता कुमारस्य मूर्द्धानंशिर
परिगृह्यजपेविनियोगः॥ॐ आयुषेजामदग्नेः॥ कश्यपस्यायुषे॥ अग-
स्त्यस्यायुषे॥ यद्देवानांयायुषं॥ तन्नेअस्तुआयुषे॥ ॥ततोग्नेरुत्त-
रतःकुमारंनीत्वा यथाकुलंतस्यकुमारस्यचूडांकारयेत्॥ ॥ततःउप-
विश्य॥ततोव्याहृतिहोमंकुर्य्यात्॥ प्रजापतिर्ऋषिर्गोयत्राद्रोग्निर्देवता

व्याहृतिहोमेविनियोगः॥ ॐभूःस्वाहा॥ प्रजापतिऋषिर्हृल्लिङ्कछन्दोवायु
र्देवताव्याहृतिहोमेविनियोगः॥ ॐभुवःस्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दः
सूर्योदेवताव्याहृतिहोमेविनियोगः॥ ॐस्वःस्वाहा॥ प्रजापतिऋषिर्बृह
तीछन्दोबृहस्पतिर्देवतामहाव्याहृतिहोमेविनियोगः॥ ॐभूर्भुवःस्वः स्व
हा॥ ॥अथयदिशाद्धायनहोमःक्रियतेतदापद्धतिरीक्षेअन्वेष्टव्यः एम·

॥ततःपादेशाग्नौसमिधंघृताक्तांजुह्वीमग्नौक्षिपेत्॥ततःपुनर्भुंगतद
क्षिणजानुःउदकस्थालीमग्नेकृत्वःअग्निःपर्युक्षणादिकंकुर्यात्॥प्रजा
पतिऋषिस्त्रिष्टुप्छन्दःसवितादेवताअग्निपर्युक्षणेविनियोगः॥ ॐदेवस
वितःप्रसुवयज्ञंप्रसुवयज्ञपतिंभगायदिव्योगन्धर्वःकेतपूःकेतन्नःपुनातु
वाचस्पतिर्वाचन्नःस्वदतुइतिहोमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधा

रणावेषनं ॥ प्रजापतिऋषि रदितिर्देवतोदकाञ्जलि प्रसेचने विनियोगः
॥ ॐ यदिनेयन्नुमंस्थाः इत्यग्नेर्ईक्षितिरणः पूर्वार्धो यो ॥ प्रजापतिऋषि रनुमति
र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ यन्नुमनेयच्चमंस्थाः इतिपश्चा
दुत्तरार्धो ॥ प्रजापतिऋषिः सरस्वतीदेवतोदकाञ्जलि प्रसेचने विनियोगः ॥
ॐ सरस्वत्यनुमंस्थाः इत्युत्तरतः पूर्वार्धो यो इति पूर्वविपरीतमञ्जलिधारण राम·

घारण ॥ ततस्तरणकमेरणवहिर्हस्थाप्य जुहिकोवध्वा वामहस्तेकृत्वा ॥ प्रजाप
तिऋषिर्वर्हिर्देवतादर्भस्तरणेभ्यञ्जने विनियोगः ॥ ॐ यत्कुंविरुनाव्य
नुवयः इतिमूलमध्यायकमेरणज्येनाभ्यनक्तितनोजलेनाभ्युक्षाग्नोक्षि
पदनेन ॥ प्रजापतिऋषि रनुष्टुप्छन्दोरुद्रोदेवता दर्भजुहिकाहोमेविनि
योगः ॥ ॐ यः पशूनामधिपतिरुद्रस्तन्निचरोवृषा पशूनस्माकंमाहिंसीरे

चूडा-
२०

नदस्तुहुनभव स्वाहा॥ ततः उत्थाय कुमारः दक्षिणहस्त स्थ स्फ्येन फल
पुष्प घृत पूर्णेन पूर्णाहुति द्यादनेन॥ प्रजापते नत्वदेतान्यन्यो विश्वरूप इदं इदो
देवना यज्ञा स्कामस्य यजनी य प्रयोगो विनियोगः॥ ॐ पूर्णा होमं यज्ञासे जु
होमि यो स्मे जुहोति वरमस्मै ददानि॥ वरं वृणे यशसा भामिलोके स्वा
हा ततः ॐ वसुभ्यः स्वाहा इत्यविछिन्नामाज्यधारा दद्यात्॥ ततो ब्रह्मद्
णम-

क्षिणं॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतच्चूडाकरणहोमक
र्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजाप
तिदैवतं ब्रह्मणेदक्षिणां नमः॥ ॥ ततो ग्निप्रदक्षिणक्रमेण हस्तधृ
त्वा ब्रह्मोत्थापनं ग्रन्थिविमोकोवा॥ ततः स्फ्येन भस्मानीय आयुषकर
णं॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे॥ ॐ कश्यपस्य त्र्यायुषमिति दक्षि

चूडा-
२१

णवाहुमूले ॥ ॐ अग्नत्पस्य व्यापुषमिति वामबाहुमूले ॥ ॐ यद्दे वा गो८
व्यापुषमिति कण्ठे ॥ ॐ तन्नो अग्नुव्यापुषमिति शिरसि विन्दुं कुर्यात् ॥
एवं कुमारपक्षे ॥ तत्र तन्नो इत्यस्य त्याने तन्ते इति विशेषः ॥ ततः पात्रस्थं
जलमपनीय पात्रं जलान्तरेण पूर्य्य तत्र कुशं प्रक्षिप्य ॥ दक्षिणादा
नं ॥ कुशत्रयाक्षतजलान्यादाय ॥ ॐ अद्य कृतैतच्चूडाकरण होम कर्म्म ण्म·

प्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानाम गोत्रायब्राह्मणाय दक्षिणां
दातुमहं सम्प्रसृजे ॥ यथाशक्ति स्वर्णं वा ॥ ततः पूर्ववद्ब्राह्मदेव्यगानं
॥ ततः कूश्माण्डीपाकमासादितब्रीहियवादिकञ्चनापितायप्रति
पादयेत् ॥ ततः आचार्यात्तत्केशमानडुहगोमयंसपञ्चनीकेजलेक्षि
पेत् ॥ ॥ इति चूडाकरण कर्म्म समाप्तं श्रीम् ॥ ॥

चूडा
२२

राम:

श्रीगणेशाय नम॥ अथोपनयनं॥ तत्र ब्राह्मचार्यवर्णापक्षे॥ ॐ अद्य अमुक
मासेऽमुकपक्षेऽमुकतिथौ अमुकगोत्र ममुकशर्म्माणं बालकं
मेभिःपुष्पचन्दनताम्बूलवासोभिरात्मानमुपनयनायिनु मा ब्राह्मचर्य्यत्वेनतं
महंवृणे॥ ॐवृतोस्मीतिप्रतिवचनं ॐपथाविहितं कर्म्मकुरु ॐक
रवाणीतिप्रतिवचनं॥ ॥तत्रगर्भाष्टमेऽब्देवाद्वादशेऽब्दे अमुकस्त्रे

उप. २१ षोडशवर्षाभ्यन्तरे उपनयनदिने पानरे वब्राह्मणत्रय सहितस्यमा
नवकस्य भोजनं मानवकभोजनञ्च किञ्चि दुग्धपानामेकमेव॥
ततो मुण्डनं॥ततः स्नानं॥ततः कुण्डलादिनाऽथाऽलंकरणं॥
ततो नूतनैकवस्त्र परिधानं॥ततः श्राद्धोमातृकापूजाभ्युदयिके
कृत्वा पुरस्तात्बहिःशालायां प्राङ्मुख उपविशेत् गोमयोपलिप्तदेशे॥ राम.

कुशखण्डिकांकुर्यात्॥तत्रक्रमः॥अभ्युक्षणादिकर्मकर्तुं कुशपवित्रादि
नमुदकमानेतव्यं कुशैर्हस्तमात्रं पूर्वाग्रान्तरपूरं समम्बादेशे परिसमुह्य
गोमयोदकेनोपलिप्य अग्निस्थापनपर्यन्तंवामहस्तंभूमावोप्य
दक्षिणंजानुंभूमौरवपातयित्वा फलपुष्यकुशानामन्यतमंगृही
त्वा रेषान्वकंकुर्यात्॥तत्रप्रथमंपूर्वाग्रा द्वादशाङ्गुलप्रमाण.

0 centimeters 5 10 15 20 25 30 35

उप.
२४

पार्थवीदेवता काधेय: पीतवर्णेनेखालिखितव्या ॥ तत्खेवा पश्चिम
भागसंलग्ना उत्तराग्रा एकविंशत्यङ्गुलप्रमाणा अग्निदेवता का
ध्येय: लोहितवर्णेनेखालिखितव्या ॥ तत्खेवासंलग्ना पूर्वाग्रखे
वानःषडङ्गुलानतालपूर्वगामिनीप्रादेशप्रमाणा प्रजापतिदेव
ताकाध्येय: कृष्णवर्णेनेखालिखितव्या ॥ तस्याश्चिषडङ्गुलानता एम.

ला पूर्वगामिनीप्रादेशप्रमाणा ईशदेवता काध्येय: नीलवर्णेनेखालि
खितव्या ॥ तस्याश्चिषडङ्गुलाचतालापूर्वगामिनी द्वादशाङ्गुलप्र
माणा सोमदेवताकाध्येय: शुक्लवर्णेनेखालिखितव्या ॥ एवंखे
खाचेन्द्रकंकृत्वा ॥ अनामिकाङ्गुष्ठाभ्यां नाभ्यएवमदः खनित्वा
ऐशान्यामरत्निमात्रेदेशेक्षिपेत् ॥ ततोजलेनखेखाश्चुक्षणंकृत्वा ॥

उप· २५

ततः सन्निधापितेकोल्मभाजनस्थेग्नौ· ज्वलन्तंनिरस्त्यनेन॥प्र
जापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवताग्निसंस्कारेविनियोगः॥ॐ
कव्यादमाग्नेप्राहैणमिदूरंयमराज्यंगच्छतुरिप्रवाहः॥ततोग्निंप्राण
येदनेन॥प्रजापतिऋषिर्बृहतीछन्दोबृहस्पतिर्देवताग्निस्थापने
विनियोगः॥ॐभूर्भुवःस्वःइत्यग्निमुखमग्निंप्राणेन॥ततोवामह रम·

ल्लंजानुचोत्थाप्य॥संञ्जलिंवज्ञा॥ॐइहेमंपितरोजातवेदोदेवेभो
ह्यंवहतुप्रजानन्नःइत्यग्नेरुपस्थानं॥ततःपातितदक्षिणजानुःप्रादे
शमितंसमिधंघृताक्तांजुह्वीमग्नोक्षिपेत्॥ततोब्रह्मावरणं॥ॐ
अद्यकर्तव्योपनयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्म
कर्तुंत्वंमेब्रह्मभव·इतिब्रह्माणंवृणुयात्॥ततोग्नेरुत्तरेणाग्निंपरिक्र

उप. २६

म्याग्नेर्दक्षिणतऽऊर्ध्वजानुः प्रत्यक्शुखलिस्थ न ब्रह्मासने प्राङ्मुखो
म्बारिधारादत्वा तस्माउपरि प्राग्ग्रानूकुशानास्तीर्य प्रत्यक्शुखलि
स्थ न वामहस्ता नाभिकाङ्कुष्ठाभ्यां ब्रह्मासनादर्भमेकं गृहीत्वा नै
त्यांक्षिपेदनेन ॥ प्रजापतिऋषिर्गायत्री छन्दोऽग्निर्देवता ब्रह्मास
नान्तरणनिरसनेविनियोगः ॥ ॐ निरस्तः परावसुरितिनैर्ऋतांश्चिरस्य ॥ ततः राम.

उदकमुपस्पृस्पः ॥ ब्रह्मारण्यमुपवेशयेदनेन ॥ प्रजापतिऋषिस्त्रिष्टुप्
छन्दोऽग्निर्देवता ब्रह्मण्यासनेविनियोगः ॥ ॐ आवसोस्तदनेहीदमि
तिछत्वाद्यन्तमं ब्रह्मारण्यमुपवेशयेत् ॥ ततोब्रह्मोपरि प्राग्ग्रकुशा
नास्तीर्य जलेनाभ्युक्ष्य ब्रह्मानस्पृष्ट्वाजपेत् ॥ प्रजापतिऋषिर्गा
यत्रीछन्दोविघ्नर्देवताजपेविनियोगः ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधा

उप- निदधे पदं। समूढमस्य पांसुले। इति जघनेनैव पथा परावर्त्य स्वानं गच्छेत्॥ ब्राह्मणपक्षेतु वरणप्रतिवचनादिकं लक्ष्यं॥ ततः उपविश्य॥ दक्षिणजानुं पातयित्वा उपरिकृतदक्षिणहस्तः करद्वय मधोमुखं भूमावारोप्य भूमिजपं कुर्यात्॥ परमेष्ठी ऋषिरनुष्टुप् छन्दोग्निर्देवता भूमिजपे विनियोगः॥ ॐ इदं भूमेर्भजामहइदं भू (३) णम

इंसुमङ्गलं॥ परासपत्नान्वाधत्स्वानेषांविन्देधनं॥ इतौवसुशब्दप्र योगः॥ ततोजानूत्थाप्य दक्षिणहस्तेनकुशचयंगृहीत्वा अग्नेरुत्त रादितः प्रदक्षिणक्रमेण पुनिरुत्तरंपरिसमूहयेत्॥ कोनऋषिर्जग तीछन्दोग्निर्देवता परिसमूहने विनियोगः॥ ॐ इमंस्तोममर्हतेजातवेदसेरथमिवसं

उप २८

म्रहे मामनीषया॥ भद्राहि नः प्रमतिरस्य संसद्यग्ने सख्ये मारिषा
मावयजन्व इत्यग्ने हुतरातः॥ ॐभ्रातृव्यो भ्रातृव्यं कृणवा महवींषिनेच्चि
तप्र नः पर्ष्णा पर्ष्णावपं॥ जीवातवे प्रतरां साधया धियोग्ने सख्ये
मारिषा मावयजन्व इति पूर्वतोसंके मत्वा समिधं साधयाधिय
त्वेदेवा हविरदन्ता कुर्तं॥ त्वमादित्यां श्रावहतां हुवम्यग्ने सख्ये राम·

मारिषा मावयजन्व इतिदक्षिणातः॥ परिसमूह्य बर्हिभिर्यैर्मूला
न्याछादयन् त्रिरावृत्तं पञ्चावृत्तंवा पुरस्ता दक्षिणातउत्तरतः प
श्चान् स्तरणं कुर्यात्॥ ततः पूर्वोक्तानूखादिरादीन् विंशतिध्रानू
मूलमध्याग्रकमेण घृताक्तान् प्रादेशद्वयपरिमितान् प्रजापतिं
मनसाध्यात्वा नूक्षीमग्नौजुहुयात्॥ ततस्तानादेववर्हिषः साग्रकु

उप· २९ शपत्रद्वयं गृहीत्वा प्रादेशमात्रं कृत्वा कुशमन्तर्धायद्भिर्घादनेन॥ प्रजापतिऋषिः पवित्रेदेवते पवित्रछेदनेविनियोगः॥ ॐ पवित्रस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तनोद्भिरनुमृज्यादनेन॥ प्रजापतिऋषिः पवित्रेदेवते पवित्रसम्मार्ज्जनेविनियोगः॥ ॐ विष्णोर्मनसापूतेस्थः॥ इति संमृज्य स्थित्वात्पात्रमुदगग्रे पवित्रेनिधायाज्यमावेषनू॥ ततोव्यस्तहस्ताङ्गु एम·

स्रोपकनिष्ठाभ्यां गृहीतपवित्राभ्यामाज्यमूर्द्धन्नीत्वा सकृदुक्षि पेदनेन॥ प्रजापतिऋषिराज्यदेवताग्न्याज्योत्पवनेविनियोगः॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मि [redacted] भिस्त्वा॥ ततोद्विरुत्क्षीं क्षिपेत्॥ ततः पवित्रेजलेनाभ्युक्षत्क्षीं मयो क्षिपेत्॥ ततः स्रुग्घृतपात्रमुदकेनानुमृज्याग्नेरुपरिनिधायाग्नेरु

उप॰ ३॰ नरनोवारचयमवनारयेनः इत्याज्यसंस्कारः॥ ॥एवंस्रुवसंस्कारोपि॥ ॥ननोभृगतदक्षिणाजानुः उदकस्थालिमयेकृत्य॥अग्निःपर्युक्षणंकुर्यात्॥प्रजापतिरृषिरदितिर्देवतोदकाञ्जलिप्रसेचनेविनियोगः॥ॐअदितेअनुमन्यस्वइत्यग्नेर्दक्षिणतःपूर्वार्धयो॥प्रजापतिरृषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने एम॰

विनियोगः॥ॐअनुमतेअनुमन्यस्वइत्यग्नेःपश्चादुत्तरार्धयो॥प्रजापतिरृषिःसरस्वतीदेवतोदकाञ्जलिप्रसेचनेविनियोगः॥ॐसरस्वत्यनुमन्यस्वइत्यग्नेरुत्तरतःपूर्वार्धयोरुभञ्जलिधारादद्यात्॥ननःप्रजापतिरृषिर्विश्वेदेवादेवतासग्निर्मयुक्षणेविनियोः॥ॐदेवसवितुःप्रसुवयज्ञंप्रसुवयज्ञपतिंभगायदिव्योगन्धर्वःकेतपूःकेतन्नःपुनातुवाचस्पत

उप. निर्बीचन्नः स्वदतु इति होमीयद्रव्यसहितस्याग्नेर्विपरीतदारिधा
३१ रणावेष्टनं कुर्य्यात्॥ ततोजानूत्थाप्य समिधमेकां फलपुष्पकुश
सहितां गृहीत्वा उपरिकृतदक्षिणहस्तोविरूपाक्षंजपेत्॥ परमे
ष्ठीन्नमोग्निगदद्धृदः कालाग्निरुद्ररूपोग्निर्देवताविरूपाक्ष
जपेविनियोगः॥ ॐ तपश्चतेजश्चश्रद्धाचहोश्चसत्यंचाक्रोधश्च राम.

त्यागश्चधृतिश्चधर्म्मश्चसत्यञ्चवाक्चमनश्चात्माचनानिप्रपद्ये
नानिमामवतु ॐ भूर्भुवःस्वरोंमहान्नमात्मानंप्रपद्ये विरूपाक्षो
स्मिदनाजिरस्मिन्शय्यापर्णेगुहानक्षेविमितेहिरण्मये त
देवानांहृदयान्यप्रत्मये कुम्भेअन्तःसन्निहितानि नानिवनभू
श्चवलसाचाक्षतोप्रमनीश्वनिमिषतूनत्सत्यं यन्नेद्वादशपुत्रा

उप ले त्वा सम्वत्सरे सम्वत्सरे कामप्रेण यज्ञेन यजयित्वा पुनर्ब्रह्म
३२ चर्य्यमुपयन्नित्वं देवेषु ब्राह्मणोस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्म
णमुपधावन्पुपत्वा धावामि जपन्तं मा मा प्रतिजापिर्जुहन्तं मा
मा प्रतिहौषीः कुर्वन्तं मा मा प्रति कारीत्वां प्रपद्ये त्वया प्रसृत
इदं कर्म्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्मे उपपद्य ताम

तां समुद्रो मा विश्वव्यचा ब्रह्मानुजानातु तु थो मा विश्वेदा ब्रह्मणः
पुत्रोनुजातु श्वात्रो मा प्रचेता मैत्रावरुणोनुजानातु तस्मै विरूपाक्षा
यदन्ताञ्जयेसमुद्राय विश्वव्यचसेनुथाय विश्वेदसे श्वात्राय प्रचे
तसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः॥ इति पठित्वा कुडमेडान्यान्य
क्का फलपुष्पं ब्रह्मणे निवेद्य दक्षिणां जानुपातयित्वा घृतान्तांस

उप ३३

मिधंतू ल्लीमग्नौ क्षिपेत्॥ ततस्त्वं संस्कृतस्य समुद्भवसव्यनाम्नो
ग्नेः पश्चात् त्वमग्नि धौदक्षिणो मारुतवक मुपवेश्य व्याहृतिहोमंकु
र्यात्॥ प्रजापतिऋषिर्गायत्रो छन्दोग्नि र्देवता व्याहृतिहोमेविनि
योगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषि हृस्त्रिक छन्दो वायु र्देवता व्या
हृतिहोमेविनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दो रामं

स्तूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषि
र्बृहती छन्दोबृहस्पति र्देवता मरुत्व्याहृतिहोमेविनियोगः॥ ॐ भूर्भुवः
स्वः स्वाहा॥ ततः पञ्चभिर्मन्त्रैः पञ्चाहुतिर्जुहुयात्॥ मानवकाचार
म्रः॥ प्रजापतिऋषिरग्नि र्देवताउपनयनहोमेविनियोगः॥ ॐ य
ग्ने व्रतपतेव्रतञ्चरिष्यामि तन्मे प्रब्रवीमि तच्छकेयं॥ तेनर्द्धयासमि

उप॰ दमहमनृतात्सत्यमुपैमि स्वाहा॥ प्रजापतिऋषिर्वा पुरुषो देवताऽउप
३४ नयनहोमे विनियोगः॥ ॐ वायो व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्रवीमि
तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥
प्रजापतिऋषिः सूर्यो देवताऽउपनयनहोमे विनियोगः॥ ॐ सूर्य
व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिद ॥ग्म॰

महमनृतात्सत्यमुपैमि स्वाहा॥ प्रजापतिऋषिश्चन्द्रो देवताऽउपन
यनहोमे विनियोगः॥ ॐ चन्द्र व्रतपते व्रतञ्चरिष्यामि॰ तन्मे प्रब्रवीमि
तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥ प्रजाप
तिऋषिरिन्द्रो देवताऽउपनयनहोमे विनियोगः॥ ॐ व्रतानां व्रतपते
व्रतं चरिष्यामि॰ तन्मे प्रब्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृ

उप॰ ना॰स्त॰त्व॰मुपै॰मि॰स्वा॰हा॥ ए॰वं॰हो॰मं॰कृ॰त्वा॰ आ॰चा॰र्य्यः॰ प॰श्चा॰दग्ने॰रुत्त॰रा
३५ ग्रे॰षु॰ कु॰शे॰षु॰ पू॰र्वा॰भि॰मु॰खः॰ ऊ॰र्द्ध॰स्थि॰तो॰ भ॰वे॰त्॰ ततो॰ ग्न्या॰चा॰र्य्य॰ो॰ मा॰र्म॰
ड्ढे॰ मा॰न॰व॰क॰ आ॰चा॰र्य्या॰ग्न्ये॰रु॰प॰रि॰कृ॰ता॰ञ्ज॰लि॰रा॰चा॰र्य्या॰भि॰मु॰खो॰मा
न॰व॰क॰ उत्त॰रा॰ ग्रे॰षु॰ कु॰शे॰षु॰ न॰थै॰व॰ति॰ष्ठे॰त्॰ स॰था॰ सो॰म॰श्च॰वा॰॰ ब्राह्म॰ण॰ रा॰म॰
त॰स्य॰ द॰क्षि॰ण॰तो॰ व॰स्या॰य॰॰ मा॰ण॰व॰क॰स्या॰ञ्ज॰लि॰मु॰द॰के॰ना॰पू॰र्य्य॰॰ प॰श्चा

दा॰चा॰र्य्य॰स्या॰पि॰ प॰र॰ये॰त्॥ ततो॰ मा॰ण॰व॰कं॰ प्रे॰क्ष॰मा॰ण॰॰ आ॰चा॰र्य्यो॰ जपे॰दि॰नि
मं॰त्रं॥ प्र॰जा॰प॰ति॰ऋ॰षि॰र्॰ नु॰ष्टु॰प्छ॰न्दो॰ ग्न्य॰ग्नि॰र्वा॰यु॰ सू॰र्य्य॰श्च॰ दे॰वो॰ दे॰व॰ता॰॰ उप
न॰य॰ने॰ मा॰न॰व॰क॰॰ प्रे॰क्ष॰मा॰ण॰स्या॰चा॰र्य्य॰स्य॰ जपे॰ वि॰नि॰यो॰ग॰ः॥ ॐ॰ आ॰ग॰न्ना
स॰म॰ग॰न्म॰हि॰ प॰शु॰ म॰र्त्तं॰ यु॰यो॰ न॰न॰॰ अ॰रि॰ष्टा॰ः स॰म्व॰रे॰ म॰हि॰ त्व॰मि॰च्चा॰त॰द्
यं॥ ततो॰ मा॰न॰व॰क॰स्य॰ ह॰स्तं॰ नी॰त्वा॰॰ आ॰चा॰र्य्यो॰ जप॰त्य॰मुं॰ म॰न्त्रं॥ प्र॰जाप

उप॰
३६

निऋषिः सविनादयोदेवता गृहीतमाणवकहस्तस्याचार्य्यस्य
जपेविनियोगः॥ अग्निस्तेहस्तमग्रहीत्सविताहस्तमग्रहीद॰र्य्यमा
हस्तमग्रहीन्मित्रस्त्वमसि कर्म्मणाग्निराचार्य्यस्तव॥ अथाचार
चार्य्योमानवकंयजुरिदंपाठयेत्॥ प्रजापतिऋषिराचार्य्योदेव
ता उपनयनेमानवकवाचनेविनियोगः॥ ॐ ब्रह्मचर्य्यमागामु रम॰

पमानयस्व॰ इत्यपिधाय॥ अथमानवकस्यदेवताश्चयंनामधेयंप
रिकल्प्याचार्य्योमानवकमिदंपृच्छेत्॥ प्रजापतिऋषिर्म्माणव
कोदेवता उपनयनेमाणवकस्यनामप्रश्नेविनियोगः॥ ॐ कोना
मासि॰ ननोमाणवकोऽसो॰ स्वकीयंकल्पितंनामउचार्य्य॰ आचा
र्य्यायउन्नंदधात्॥ प्रजापतिऋषिर्म्माणवकोदेवता उपनयनेमा

उप. नवक नामकथने नि नियोगः॥ ॐ विष्णु शर्म्म नामास्मि॥ ॥प्र
३) णोद का ज्जानि मुत्सृज्य स्वाचार्य्योदक्षिणेनपाणिना मानवकस्यद
क्षिणपाणिं साङ्गुष्ठ मुन्नामं गृह्यात्मनेन॥ मन्त्रेचाशौ शब्द स्थाने स
म्बोधने न नाम प्रयोक्तव्यं॥ प्रजापतिर्ऋषिः सविताग्निर्देवता पूषणोदेव
ता उपनयने मानवक हस्त ग्रहणे विनियोगः॥ ॐ देवस्यत्वेसवितुः प्र राम

सवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि श्रीविष्णु शर्म्मन्॥ततो
मानवकस्य हस्तं गृहीत्वा जपेत्॥ प्रजापतिर्ऋषिः सवितादेवता गृ
हीत माणवक हस्ता चार्य्य जपेविनियोगः॥ ॐ अग्नेस्त्वहस्तमग्रहीद्द
क्षिणमग्रहीत्त्वमसि कर्म्मणाग्निराचार्य्यस्तव॥ अथैनं देवा
त्यमेव माणवकं अग्निं प्रदक्षिणमावर्त्तयेदनेन॥ प्रजापतिर्ऋषि

0 centimeters 5 10 15 20 25 30 35

उप· [नुष्टुप्छन्दः सूर्य्यो देवता उपनयने मानवकमावर्त्तने विनियोगः॥८
३८ ॐ सूर्य्यस्यावृतमन्वावर्त्ते स्वश्रीर्विष्णुः शर्म्मानु॥ ततो दक्षिणेनपाणि
ना· मानवकस्य दक्षिणं भ्रुवमनुस्पृश्य नाभिं मनुस्पृ
शेदनेन॥ ध्रुवमुपदिश्य स्थाने द्वितीयानं नामग्रयोक्तव्यं॥ प्रजापतिर्ऋ
षिरनुष्टुप्छन्दो नाभ्यनकोदेवतेउपनयनेब्रह्मचारिनाभिस्पर्शने विनियोगः॥ ॐ ध्रुवं ते पाणिं ग्रभ्णामि· श्रीर्विष्णुः शर्म्मा गां॥ ततो नाभिदेशो परिदेशमभिस्पृशेदनेन॥
प्रजापतिर्ऋषिर्बृहतीछन्दो हृदयं देवतोपनयने ब्रह्मचारिनाभिदेशो परिदेशस्प
र्शने विनियोगः॥ ॐ ध्रुवं ते हृदयं परिदधामि· श्रीर्विष्णुः शर्म्मा गां॥ त
तो मानवकस्य हृदयं स्पृशेदनेन॥ प्रजापतिर्ऋषिः कृशानुर्देवता उप

उप· ३९

नयनेब्रह्मचारिहृदयस्पर्शनेविनियोगः॥ॐकृष्णनरंतेपरिददामि·श्रीविष्णुशर्म्मणः॥ततोदक्षिणेनपाणिनाभ्राणवकस्यदक्षिणंसमालभ्यजपेत्॥प्रजापतिरृषिःप्रजापतिर्देवताउपनयनेब्रह्मचारिदक्षिणंसस्पर्शनेविनियोगः॥ॐप्रजापतेत्वापरिददामि·श्रीविष्णुशर्म्मणः॥ततोवामेनपाणिनाःवामांसंस्पृशन्जपेत्॥ एम·

प्रजापतिरृषिःसवितादेवताउपनयनेब्रह्मचारिसर्वाङ्गसस्पर्शनेविनियोगः॥ॐदेवसवित्वासवित्रेपरिददामि·श्रीविष्णुशर्म्मणः॥अथैनंबोधयति॥प्रजापतिरृषिर्ब्रह्मचारिदेवताउपनयनेब्रह्मचारिसंबोधनेविनियोगः॥ॐब्रह्मचार्य्यसि·विष्णुशर्म्मणः॥अथैनंप्रैषंकारयति॥प्रजापतिरृषिर्ब्रह्मचारिदेवताउपनयनेब्रह्मचारिप्रैष्यने

उप· विनियोगः॥ॐ समिधमाधेहि॰ ॐ श्रायोअद्यान॰ ॐ कर्म्मकुरु
४० ॐ मादित्वाग्नीः प्रतिप्रश्नंचब्रह्मचारिणमॐ इतिवक्तव्यं॥ततः श्रा
चार्य्यः अग्नेरुत्तरतः प्राङ्मुखउदगग्रेदर्भकुशेषूपविशेत्॥मान
वकश्चप्रत्यङ्मुखोभूत्वा॰ भूगतदक्षिणजानुराचार्य्याभिमुखस्त
थैवउदगग्रेदर्भकुशेषूपविशेत्॥अथैनंमानवक॰ आचार्य्यश्चिरा राम·

धृतां॰ मेखलांकृत्वा॰ यथाप्रवरग्रथिंयुतां॰ प्रदक्षिणंपरिधापयन्
मन्त्रद्वयंपाठयेत्॥प्रजापतिऋषिस्त्रिष्टुप्छन्दोमेखलादेवताउप
नयनेमाणवकमेखलापरिधापनेविनियोगः॥ॐ इयंदुरुक्तात्प
रिबाधमानावर्णंपवित्रंपुनतीमआगात्॥प्राणापानाभ्यांबलमाव
हन्तीस्वसादेवीसुभगामेखलेह॥ॐ यज्ञस्यगोस्त्रीतपसःपरस्वी॰

उप॰ ४१ घ्रंनीरक्षः सहमाना श्वरातीः॥सामासमन्नमभिपर्य्येहिभेऽभ
र्त्तारलेमखलेमारिषाम॥ततः श्राचामेत्कौपीनंपरिधापयेत्
तू॥सचपूरणयज्ञोपवीतभाराडाभ्यांब्राह्मणेभ्यःप्रत्येकंमा
नवकोदद्यात्॥ततोयज्ञोपवीतंपरिधापयेन्नपाठयेत्तू॥ब्रह्म ॐम॰
चारिपठनीयोमंत्रः॥प्रजापतिर्ऋषिर्गायत्रीछन्दोविश्वेदेवा

देवताउपनयनेयज्ञोपवीतपरिधानेविनियोगः॥ॐयज्ञोपवीत
मसियज्ञस्यत्वोपवीतेनोपनह्यामि॥ततःएणोयमजिनंपरि
धापयेत्पाठयेत्तू॥प्रजापतिर्ऋषिःशार्ङ्गरीछन्दोऽजिनंदेवताउ
पनयनेश्रजिनंपरिधापनेविनियोगः॥ॐमित्रस्यचक्षुर्द्धरुणं
वतीयज्ञेजोयज्ञस्थिवरंसमिद्धं॥श्रन्नाहनस्पत्वसनंजविष्ठं

उप. ४२ पवीतदंवाह्यजिनंदधेहं॥ननोमाणवकआचार्य्यस्यतमीपंगेछ
देवंकृवाणः॥ॐ अधीहिभोःसावित्रीम्मेभवाननुब्रवीतु आचार्य्य
तम्मैमानवकायाध्ययनार्थमुपसन्नायसमीक्षनाय तवप्रपिप
क्षिनाय सावित्रीमनुब्रूयात् प्राकपादशः॥ननोर्द्दशःननःकृत्वा
सावित्रीमध्यापयेतू॥माणवकोपिनथैवाधीयातू॥ ॥ननं राम.

मानवकस्यदक्षिणाकर्णे सावित्रस्य विश्वामित्रऋषिर्गायत्रीछन्दः
सवितादेवताउपनयने सावित्रीदाने विनियोगः॥ॐ तत्सवितुर्वरेणं
भर्गोदेवस्यधीमहीधियोयोनःप्रचोदयात्॥इतिप्रथमावृत्तोक
मःआद्वितीयायांतत्सवितुर्वरेणंभर्गोदेवस्यधीमहिःधियोयो
नप्रचोदयात्॥तृतीयायांतत्सवितुर्वरेणंभर्गोदेवस्यधीमहिः

उप॰ विशो यो नः प्रचोदयात्॥ अत्रानुसहपाठो विशेषः॥ ततः ॐ महाव्या
४३ हृतीनां॥ प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निर्वायुसूर्यो
देवताउपनयने व्याहृतिदाने विनियोगः॥ ॐ भूर्भौं ॐ भुवर्भौं ॐ स्व
र्भौं इति ॐकारशिरस्कान्॥ अथनरशुंकेशान्तिकमनग्नि ङ्खिनम
वरणपालाशदण्डंप्रयच्छ॒ मानवकंवाचयति॥ प्रजापतिऋषिः पं राम॰

क्रि॰ ङ्खिदोदण्डाग्निर्देवतेउपनयनेदण्डार्पणेविनियोगः॥ ॐ
सुश्रवः सुश्रवसंमाकुरु॒ यथात्वमग्नेसुश्रवः सुश्रवोदेवेष्वेवमहंसु
श्रवः सुश्रवाब्राह्मणेषुभूयासं॥ अथमानवको भैक्षंचरेत्॥ प्रथ
ममातरमेव भिक्षांयाचेत्॥ ॐ भवतिभिक्षांम्मेदेहि श्रद्धेनम
न्त्रेणयाचेत् माणवकः प्रथमभैक्षमाचार्य्यायसमर्प्पयेत्॥ तदन

न्तरमन्त्रमपि पठित्वा तत्रैव पात्रेचेत्॥ आचार्यान्तु ॐ भवन्भिक्षां मे
देहि इति पुरुषमपि पात्रेचेत्॥ अथ यदि समिदाधानं तस्मिन्नेव
क्षणे क्रियते॥ अथ यदि दिनान्तरे समावर्तनं क्रियते तदा व्याहृति
होमादिकं देवतानांतरं तत्रैव समाप्य तदा चैवाग्नावाचार्यान्कर्तृ
त्वं॥ अथ सायं सन्ध्यामुपास्याग्नेऽग्नेसविनरिति क्रियते तदा अन्न राम.

ॐकारं कुशण्डिकामनुसंधाय व्याहृतिहोमं च कृत्वाऽग्नेनरेति समि
दाधानप्रयोगः कर्तव्यः॥ तत्रक्रमः॥ माणवकः स्वयंदेशमितसमिध
मसंवक्ष्यमाणविधिनाजुहुयात्॥ एकांप्रथमतः स्रुक्स्रुवौद्वितीयां
मादाय॥ प्रजापतेऋषिरग्निर्देवताग्नेसमिधादाने विनियो
गः॥ ॐ अग्नेयेसमिधमाहार्षं बृहतेजानायेदसे॥ यथात्वमग्नेस

उप॰ ४५ मिधासमिद्भ्सेवमहमायुषामेधयावर्च्चसाप्रजयापशुभिर्ब्र
ह्मवर्च्चसेनधनेनाद्येनसमेधिषीयत्स्वाहा॥इतिजुहुयात्॥
॥अपरांसमिधमाज्यंप्रक्षिपेत्॥ ॥ततश्चाचार्य्योव्याह
तिहोमंकुर्य्यात्॥प्रजापतिऋषिर्गायत्रीछन्दोग्निर्देवताव्याह
तिहोमेविनियोगः॥ॐभूःस्वाहा॥प्रजापतिऋषिरुष्णिक्छन्दोवा

एम॰

पुर्दैवताव्याहृतिहोमेविनियोगः॥ॐभुवःस्वाहा॥प्रजापतिऋषिरनु
ष्टुप्छन्दःसूर्य्योदेवताव्याहृतिहोमेविनियोगः॥ॐस्वःस्वाहा॥प्रजापति
र्ऋषिर्बृहतीछन्दोबृहस्पतिर्देवता॰महाव्याहृतिहोमेविनियोगः॥ॐभूर्भु
वःस्वःस्वाहा॥अधुनापदिशाद्यायनहोमःक्रियतेतदाप्रद्धतिहोमेष्व
वद्यः॥ततःप्रादेशमितांसमिधंघृताक्तांजुह्वीमन्त्रेणाधिपेत्॥त

उप. ४६ तः पुनर्ऋगनदक्षिणाजानुः उदकस्थाली मग्नेकृत्य अग्निः पर्युक्षणादि कुर्यात्॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियोगः॥ ॐ देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु॥ इति होमीयघृतव्यसहितस्याग्नेर्विपरीतवारिधारयावेष्टनं॥ ग्रन्थ.

ततः प्रजापतिऋषिरादित्यैर्वतोदकाञ्जलिप्रेसेचने विनियोगः ॐ अदितेऽनुमन्यस्वेत्यस्येष्टिगतः पूर्वार्धो॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रेसेचने विनियोगः॥ ॐ अनुमतेऽन्वमंस्थाः शेषः पश्चादुन्नयेत्॥ प्रजापतिऋषिः सरस्वतीदेवतोदकाञ्जलिप्रेसेचने विनियोगः॥ ॐ सरस्वत्यनुमंस्थाः इत्युन्नयेतः पूर्वार्धो॥ पूर्वविपरीतमज्ञ

उप॰ लिधारयति॥ ततस्तूष्णीमेवाहुत्वाप्युपरिष्टाज्जुहोति वा
४ महत्तिकृत्वा॥ प्रजापतिऋषिर्बृहतीदेवतादर्भस्तूष्णीमाज्यहोमे विनियोगः॥ ॐ श्रद्धांविश्वाय्वनुवयः इति मूलमन्त्रायेणेध्मसंनां कृत्वा जलेनाभ्युक्ष्याग्नौक्षिपेदनेन॥ प्रजापतिऋषिरनुष्टुप्छन्दो हुङ्कारोदेवतादर्भजुहिकाहोमे विनियोगः॥ ॐ यः पशूनामधिपतीर्हु ॐ

इत्यग्निचेतयेत्॥ पशूनस्माकंमाहिंसीरेतदग्नुङ्गनवत्वाहा॥
ततउत्थायब्रह्मचारिदक्षिणाहस्तस्यस्रुक्वेणाघृतपुष्पफलपू
र्णेनपूर्णाहुतिंद्यात्॥ प्रजापतिऋषिर्विराट्छन्दःइन्द्रोदेवता
यज्ञस्कामस्यपत्नीयज्ञयोगेविनियोगः॥ ॐ पूर्णाहोमंयज्ञस्तेजुहो
मियास्मेजुहोतिवरमस्मैददाति॥ वरंपूर्णायज्ञस्तामभिलोकेत्वा॰

0 centimeters 5 10 15 20 25 30 35

उप ४८ ण॰ ततः ॐ वस्त्र मन्त्रोहत्पवित्रेण आज्यधारां दद्यात्॥ ॥ततोब्र
ह्मदक्षिणां॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतदुपनयन
होमकर्म्मणि कृताकृतावेक्षण रूप ब्रह्मकर्म्म प्रतिष्ठार्थमिदं पू
र्णपात्रं प्रजापतिदैवतं ब्रह्मणेदक्षिणां ददे नमः॥ ॥ततोग्निप्रद॰
क्षिणक्रमेण हस्तं नीत्वा॰ ब्रह्मणोत्थापनं॰ ग्रन्थिविमोकोवा॥त ण॰म॰

तः स्रुवेण भस्मानीय आयुष करणे॥ ॐ आयुर्यज्ञमदग्नेरित्यूर्ध्व
दि॥ ॐ कस्यपस्यायुषमिति दक्षिणबाहुमूले॥ ॐ अगस्त्यस्य
आयुषमिति सिस्तिवामबाहुमूले॥ ॐ यद्देवानामायुषमिति
कण्ठे॥ ॐ तन्नोअस्त्वायुषमिति शिरसि विन्दुंकुर्य्यात्॥ माण
वकपक्षे॰ तन्नोस्त्वित्यन्ते तन्नेशानेति विशेषः॥ ततोपात्रस्थजलमप

उप- नीरान्मज्जनेनापूर्य्य तत्र कुसुमं प्रक्षिप्य ॥ दक्षिणादानं ॥ कुश
४९ त्रयाक्षतजलान्यादाय ॥ ॐ अद्य कृतैतदुपनयनहोमकर्म्मप्रति
ष्ठार्थं गोमिथुनं रुद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां रा
तुमहं सम्पृत्सृज्य ॥ आचान्तं यथाशक्तिवरणीयं ॥ ततः पूर्ववद्ब्रा
ह्मदैव्यगानं ॥ उपनीतः चाहोरात्रत्रयमक्षारलवणान्नभुञ्जीत ॥ राम-
॥ इत्युपनयनकर्म्म समाप्तं शुभम् ॥

अथ द्वैरागानां वेदारम्भः ॥ ॥ ततः आचार्य्यो मातृकापूजां शु
द्धिं कृत्वा पुरस्तात् बहिः शालायां प्राङ्मुख उपविश्य कुशैह
स्तमात्रं भूमिं परिसमुह्य तां कुशैरीशान्यां परित्यज्य गोमयोद
केनोपलिप्य अग्निस्थापनपर्य्यन्तं वामहस्ते

वे॰दा॰ ५॰ अथ छन्दोगानां वेदारम्भः ॥ ॥ नमः श्राचार्यो मातृकापूजा
मुदपिके कृत्वा पुरस्तात् बहिःशालायाः प्राङ्मुखउपविशेत् गोम
योपलिप्तदेशे कुशास्तिडकां कुर्यात् तत्रक्रमः ॥ अभ्युक्षणा
दिकर्म्म कर्तुं कुशपञ्चादिनमुदितमुदकमानेतव्यं कुशैर्हस्त
मात्रंपूर्वोत्तरपूरंसमन्तादेशेपरिसमुह्य गोमयोदकेनोपलि
प्य अग्निस्थापनप्रत्येनंवामहस्तंभूमावोप्य दक्षिणंजानुभू
मोरवपातयित्वा फलपुष्पकुशानामन्तर्मुष्टौगृहीत्वा रेखापंच्च
कंकुर्यात् ॥ तत्रप्रथमपूर्वाग्रा द्वादशाङ्गुलप्रमाणं पृथिवीदेव
ताकाध्येयं पीतवर्णंरेखालिखितव्या ॥ तत्रेखापश्चिमभागसं
लग्ना एकविंशत्यङ्गुलप्रमाणं अग्निदेवताकाध्येयं लोहितवर्णा
इत्तरत्रा

राम॰

वे॰ रा॰ ५१ लेखा लिखितव्या॥ तल्लेखा संलग्ना पूर्वाय लेखातः षडङ्गुलान्त
राला पूर्वगामिनी प्रादेशप्रमाणा प्रजापतिदेवताकाध्येयकृ-
ष्णवर्णलेखा लिखितव्या॥ तस्याश्चपि षडङ्गुलान्तराला पूर्व
गामिनी प्रादेशप्रमाणा इंद्रदेवताकाध्येयनीलवर्णलेखा लि
खितव्या॥ तस्याश्चपि षडङ्गुलान्तराला पूर्वगामिनी द्वादशाङ्गुल राम॰

प्रमाणा सोमदेवताकाध्येयशुक्लवर्णलेखा लिखितव्या॥ एवं
लेखापञ्चकंकृत्वा॥ अनामिकाङ्गुष्ठाभ्यां ताभ्यएवमृदःगृहीत्वा ऐशान्यामरत्निमात्रेदेशेक्षिपेत्॥ ततोजलेनलेखाभुक्षः
णंकृत्वा॥ ततःसन्निधापितकांस्यभाजनस्थेनौ ज्वलत्तृणंनि
रसेत्तनेन॥ प्रजापतिऋषित्रिषुपृच्छंदो अग्निर्देवताअग्निसं-

स्कोरविनियोगः॥ ॐ कयादमग्निं प्रहिणोमि दूरंयमराज्ञोगच्छ
प्रवाहः॥ ततोऽग्निंप्रणयेद्दक्षेण॥ प्रजापतिऋषिर्बृहतीछन्दोबृ
हस्पतिर्देवताग्न्याधानेविनियोगः॥ ॐ भूर्भुवःस्वःईन्नमु
खमग्निंप्रणयेत्॥ ततोवामहस्तंजानूत्तोत्थाप्य॥ ग्रञ्जलिंव
ध्वा॥ ॐईहैवायमितरोजातवेदादेवेभोहव्यंवहतुप्रजानन्नः

राम

न्यग्नेरुपस्थानं॥ ततःपाणिनादक्षिणजानुःपादशमितोसमिधं
घृताक्तांतूष्णीमग्नौक्षिपेत्॥ ततोब्रह्मावरणं॥ ॐअद्यकर्तव्य
वेदारम्भहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुं
त्वंमेब्रह्माभवेतिब्रह्माणंवृणुयात्॥ ततोग्नेरुत्तरेणपरिस्त्या
ग्नेर्दक्षिणतऊर्द्ध्वजानुःप्रत्यङ्मुखस्तिष्ठन्ब्रह्मासंपाङ्मुखोवाग्र

वेदा· धारा दत्वा· तस्याऽउपरि प्राग ग्रा दूर्व्वा शा नालो र्य्यो· प्रत्य ङ्मुख स्तिष्ठ
न· वामहस्ता नामिका ङ्गुष्ठा भ्यां· ब्रह्मा स ना दर्भ मे कं गृहीत्वा नैऋतीं
२२ क्षिपेदनेन॥ प्रजापति रृषि र्गायत्री छ न्दो ऽग्नि र्दैवता· ब्रह्मा सनात्
रणे निरसने वि नियोगः॥ ॐ निरस्तः परावसुः इति नृणा न्निरस्य॥ राम·
ततः उदक मुपस्पृश्य॥ ब्रह्मा णा मुपवेशये दनेन॥ प्रजा पतिरृ

षि स्त्रि ष्टुप् छ न्दो ऽग्नि र्दैवता ब्रह्मा स्थापने वि नियोगः॥ ॐ ग्रा वसोः सद
ने सीद इति ङ्ग्रा ग्न्य न्तमं ब्रह्मा णा मुपवेशये त्॥ ततो ब्रह्मो परि प्रा ग्
ग्र कुशा नाली र्य्ये· जलेना भ्यु क्ष्य ब्रह्मा नं स्पृ ष्ट्वा जपेत्॥ प्रजा पति
रृषि र्गायत्री छ न्दो विष्णु र्दैवता जपे वि नियोगः॥ ॐ इदं विष्णु र्वि
चक्रमे त्रे धा नि दधे पदं॥ समू ढ मस्य पां सुले॥ इति ज प्त्वा नैव पथा

पराङ्मुत्यस्तत्यानंगङ्कृत्वा ब्राह्मणपक्षेनुवरणप्रतिवचनादिकस्तू
क्ष्णं॥ततउपविश्य॥दक्षिणाजानुंपातयित्वा-उपरिकृतदक्षिणा
हस्तःकरद्वयमधोमुखंभूमावारोप्यभूमिजपंकुर्यात्॥परमेष्ठी॥
ऋषिरनुष्टुप्छन्दोग्निर्देवताभूमिजपेविनियोगः॥ॐइदंभूमेर्भ
जामहइदंभद्रंसुमङ्गलं॥पशूनपत्न्याधत्वान्येवांविन्देधनं॥ राम.

एवोक्तशब्दप्रयोगः॥ततोजानूत्थाप्य-दक्षिणाहस्तेनकुशत्रयंगृ-
हीत्वा-अग्नेरुत्तरतोदिनःप्रदक्षिणाक्रमेणप्रतिसव्यंपरिसमूह्य
॥॥कौत्सऋषिर्जगतीछन्दोग्निर्देवताघृतस्यघडुहस्यघृतेग्रहस्य
ग्निमाहरेतेशब्दोपरिसमूहनेविनियोगः॥ॐइमंस्तोममर्हतेजातवेद
सेरथमिवसम्महेमामनीषया॥भद्राहिनःप्रमतिरस्यसंसघ्नेत

स्येमारिषामावयनवऽइत्पग्नेहन्तरतः॥ॐभरामेध्मंकृणवामाहवीं
षिचिनवन्तःपर्व्वणापर्व्वणावयं॥जीवातवेप्रतरांसाधयाधियोग्ने
सख्येमारिषामावयनवऽइतिपूर्व्वतः॥सकेमत्वासमिधंसाधयाधि
येहविर्देवाहविरदन्त्याहुतं॥त्वमादित्यांश्रावहतांह्युत्तमस्यग्नेसख्ये
मारिषामावयनवऽइतिदक्षिणतः॥पारिसमूह्यवर्हिरग्नेर्मूलान्पा

रामः

दयन्नविरावृतंपञ्चावृतंवापुरस्ताद्दक्षिणतऽउत्तरतःपश्चात्स्तरणं
कुर्य्यात्॥ततःपूर्व्वोक्तानूखादीनादिनविंशतिध्मान्मूलमध्याग्रकेम
णसमानान्प्रादेशद्वयपरिमितान्प्रजापतिंमनसाध्यात्वाजुह्वीम
योजुहुयात्॥ततस्त्रीनादेववर्हिषःसाग्रकुशपत्रद्वयंगृहीत्वाप्रादेश
मात्रंकृत्वाकुशमन्तर्द्धायछिद्रादनेन॥प्रजापतिऋषिःपवित्रेदेवेत

पवित्रेछेदनेविनियोगः॥ॐ पवित्रेस्थोवैष्णव्यौ॰सवितुर्वः प्रसव
उत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥ इतिसंमृज्याज्यस्थाल्यामुदगग्रेपवित्रेनिधा
यात्मानंप्रोक्षेत्॥ ततोव्याहृत्याहुत्वोपकनिष्ठाभ्यां॰गृहीतपवित्रा
भ्यामाज्यमूर्ध्नीत्वा॰सकृन्नक्षिपेदग्नौ॥ प्रजापतिर्ऋषिरात्मदेव

ता॰आज्योत्पवनेविनियोगः॥ॐ देवस्त्वासवितोत्पुनात्वच्छिद्रेणप
वित्रेणवसोःसूर्यस्यरश्मिभिः स्वाहा॰तेनोद्विस्रुवंक्षिपेत्॥ ततःपवि
त्रजलेनाभ्युक्षन्स्रुवंमध्नोक्षिपेत्॥ ततःआज्यपात्रस्रुवकेनाउप
ज्याग्नेरुपरिनिधायाग्नेरुत्तरतोवात्रयंभवतास्थेत्॥ इत्याज्यसंस्का
रः॥ ॥एवंस्रुवसंस्कारोपि॥ ॥ततोध्रुगनदक्षिणाजानुःउदक

ग्रम॰

स्थालिमग्नेकृत्व॥ अग्निःपर्युक्षणंकुर्यात्॥ प्रजापतिऋषिरदि-
तिर्देवतोदकाञ्जलिप्रसेचनेविनियोगः॥ ॐ अदितेअनुमन्यस्व·
इत्यग्नेर्दक्षिणतःपूर्वाग्रं॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्ज-
लिप्रसेचनेविनियोगः॥ ॐ अनुमतेअनुमन्यस्व·इत्यग्नेःपश्चादु
त्तराग्रं॥ प्रजापतिऋषिःसरस्वतीदेवतोदकाञ्जलिप्रसेचनेविनि राम·

योगः॥ ॐ सरस्वत्यनुमन्यस्व·इत्यग्नेरुत्तरतःपूर्वाग्रमंजलिधारा-द
द्यात्॥ ततःप्रजापतिऋषिस्त्विक्पूषादेवतोअग्निपर्यु
क्षणेविनियोगः॥ ॐ देवसवितःप्रसुवयज्ञंप्रसुवयज्ञपतिंभगाय
॥ दिव्योगन्धर्वःकेतपूःकेतन्नःपुनातु·वाचस्पतिर्वाचन्नःस्वदतु·इति
होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधारयावेष्टनंकुर्यात्॥ ततो

वेदा-
५८

जानुन्थाप्य समिधमेकां कल्पुष्यकुशसहितां गृहीत्वा उपरिकृ
तदक्षिणहस्तो विरूपाक्षंजपेत्॥ परमेष्ठीऋषिर्निगदद्रुद्रः का
लाग्निरुद्ररुपोग्निर्देवता विरूपाक्षजपेविनियोगः॥ ॐतपश्चतेज
श्चश्रद्धाचहीश्चसत्यंचाक्रोधश्चत्यागश्चधृतिश्चधर्मश्चसत्यंच
वाक्चमनश्चात्मानंतानिप्रपद्येतानिमामवतु ॐभूर्भुवःस्वरोँ एम.

महन्नमात्मानंप्रपद्येविरूपाक्षोसिदन्नाजिरस्यतेशपार्णो
रहन्नरिक्षेत्रिमितंहिरण्मयंतद्देवानांहृदयान्यप्रस्रवे कुम्रे
ग्रन्तःसन्निहितानितानिबलभूश्चबलसावरक्षतोप्रमत्तोग्नि
मिषन्तत्सत्यंयत्तेद्वादशपुत्रास्त्वासंवत्सरेसंवत्सरेकाम
प्रेरयज्ञेनयाजयित्वापुनर्ब्रह्मवर्चसमुपयन्तित्वंदेवब्राह्म

वेदा० २९

णोस्मꣳ मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावतूपत्वाध्यावामिज
पत्ने मामावजिजापीर्ज्जुनं मामोप्रतिहोषिः कुर्ध्वं मामाप्रति
कार्षित्वांप्रपद्ये त्वयाप्रस्तुत इदंकर्म्मकरिष्यामि तन्मेराध्य
तां तन्मेउपपद्यतां समुद्रोमाविश्वव्यचा ब्रह्मणुजानातु मुखो
माविश्वेदाब्रह्मणः पुत्रोनुजानातु श्वात्रोमाप्रचेता मेत्रावरुणो
तत्रेसमृध्यतां

राम०

नुजानातु तस्मैविरूपाक्षायदन्ताज्जयेसमुद्रायविश्वव्यचसेनु
थायविश्वेदसेश्वात्रायप्रचेतसेसहस्राक्षायब्रह्मणःपुत्रायन
मः॥इतिपठित्वाकुशमैक्षान्पात्रकाफलपुष्पंब्रह्मणेनिवेद
दक्षिणजानुपातयित्वाघृताक्तांसमिधंजुह्वीमग्नौक्षिपेत्॥
तदक्षिणेमाणावुकमुपवेश्यःमाहुतिहोमंकुर्य्यात्॥प्रजापतिब्र

नि

वेदा. विर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनियोगः॥ॐ भूः स्वाहा॥प्र
जापतिऋषिरुष्णिक्छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ॐ
भुवः स्वाहा॥प्रजापतिऋषिरनुष्टुप्छन्दो सूर्यो देवता व्याहृतिहोमे
विनियोगः॥ॐ स्वः स्वाहा॥प्रजापतेऋषिर्बृहतीछन्दो बृहस्पतिर्देवता राम.
महाव्याहृतिहोमे विनियोगः॥ॐ भूर्भुवः स्वः स्वाहा॥ॐ ऋग्वेदाय स्वाहा

ॐ पृथिव्यै स्वाहा॥ॐ अग्नये स्वाहा॥ॐ ब्रह्मणे स्वाहा॥ॐ सोमाय
स्वाहा॥ॐ प्रजापतये स्वाहा॥ॐ छन्दोभ्यः स्वाहा॥ॐ देवेभ्यः स्वा
हा॥ॐ ऋषिभ्यः स्वाहा॥ॐ श्रद्धायै स्वाहा॥ॐ मेधायै स्वाहा॥ॐ
प्रज्ञायै स्वाहा॥ॐ धारणायै स्वाहा॥ॐ सदसस्पतये स्वाहा॥ॐ
अनुमतये स्वाहा॥ॐ यजुर्वेदाय स्वाहा॥ॐ अन्तरिक्षाय स्वाहा॥८
दो

वेदा- ॐ वायवेस्वाहा॥ॐ ब्रह्मणेस्वाहा॥ॐ सामवेदायस्वाहा॥ॐ देवे-
स्वाहा॥ॐ सूर्य्यायस्वाहा॥ॐ ब्रह्मणेस्वाहा॥ॐ अथर्ववेदायस्वा
६१ हा॥ॐ दिग्भ्य स्वाहा॥ॐ चन्द्रमसेस्वाहा॥ॐ विष्णवेस्वाहा॥ॐ स-
रस्वतेस्वाहा॥ॐ वरुणायस्वाहा॥ॐ इन्द्रायस्वाहा॥ॐ अग्नये
स्विष्टकृतेस्वाहा॥ॐ भूःस्वाहा॥ॐ भुवःस्वाहा॥ॐ स्वःस्वाहा॥ॐ राम-

भूर्भुवस्वःस्वाहा॥इत्याज्याहुतिनत्वा मिषोरा केवेदारम्भंगुरुका
रयेत्॥ततःश्राचार्य्येण॥ॐवेदानूअधीहोभोइतिब्रूयात्॥ततो
मानवकेन॥ॐ अध्यापयतुमेभवान्इत्युक्ते॥तत्रक्रमस्वदक्षि
णतउपविश्योदङ्मुखंतिष्ठन्नाचान्तःप्रक्षालितपाणिर्भूत्वाकृताचा
र्य्यप्रणामंमानवकःश्राचार्य्येनप्रणवादिप्रणवान्तंसव्याहृति

वेदा- कोगायत्रीमानवकाय पाठयेत्॥ॐभूःॐभुवःॐस्वःॐमहःॐज
नःॐतपःॐसत्यंःॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः
६२ प्रचोदयात्ॐ॥इतिसव्याहृतिकोगायत्रीमभ्याप्य॥ततोवेदानुच्च
भ्यापयेत्॥आचार्यप्रागग्रेषुकुशेषुआसीनंपवित्रपाणिमुदङ्मु
खंनिकटेनआचार्यंनपाठयेत्॥ ॥हरिःॐ॥प्रजापतिऋर्विर्गायत्र रामः

छन्दोग्निर्देवतावेदारम्भेविनियोगः॥ॐसमिधाग्निंदुवस्यतघृतै
र्बोधयतातिथिं॥आस्मिन्हव्याजुहोतनःस्वमिचायशोजिष्ठेदधं
निदधेजुहोतनःस्वग्नयेजातवेदसे॥ऋग्वेदादिमंत्रस्यमधुछन्द
विर्गायत्रीछंदोग्निर्देवतावेदारम्भेविनियोग॥ॐअग्निमीळेपुरो
हितंयज्ञस्यदेवमृत्विजं॥होतारंरत्नधातमम्॥यजुर्वेदादिमंत्रस्यपर

मेधी प्रजापतिऋषि र्यजुः षाड्हदो नासिशारवो वत्स गावोदेव ताज्ञा
खड्दिनेत मुन्नय वनूसापाकापाकरोगशारवा यागो पस्पर्शने विनि
योगः॥ ॐ इषेत्वोर्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतुश्रेष्ठतमाय
कर्मणआप्यायध्वमघ्न्याइन्द्राय भागं प्रजावतीरनमीवाअयक्ष्मा
